Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

Vikāla. So, the Rākṣasa started galloping out of fear. The thief was also afraid and thought that this can not be a real horse because I tried to stop it but this horse (Rākṣasa) continued to run as usual. So, I most jump on the soft land for my survival. Meanwhile the horse (Rākṣasa) started moving under one Banyan tree. The thief got a chance and caught the branch of the Banyan tree and started clinging to it. Thus both of them had regained their hopes of life.

A monkey, who was the friend of the Rākṣasa, stayed in the Banyan tree. The monkey saw the fearful face of the Rākṣasa, who was in form of a horse till now, assumed the original form and started moving towards the thief with fear. The thief too, became very angry towards the monkey and started biting its long tail briskly. The monkey was also afraid. On looking at the fearful face of the monkey, the Rākṣasa recited the following verse and ran away.

यादृशी वदनच्छाया दृश्यते तव वानर।
विकालेन गृहीतोऽसि यः परैति स जीवति॥

[From the colour that I see of your face, oh monkey! You are seized by Vikāla; he therefore, lives who runs away]

### Important Ślokas their meaning and explanation

दुर्गस्त्रिकूटः, परिखा समुद्रो, रक्षांसि योधा धनदाच्च वित्तम्।
शास्त्रं च यस्योशनसा प्रणीतं, स रावणो दैववशाद्विपन्नः॥ 83॥

Meaning - The Rāvana, who had the mountain Trikūṭa for his fort, the ocean for the ditch, demons for warriors and kubera for his treaser and who had the science of politics composed for him by Uśnas, perished in obedience to the will of fate.

अन्वयः – यस्य त्रिफूटः दुर्गः समूद्रः परिखा, योधाः रक्षांसि, धनदाच्च वित्तं, उशनसा प्रणीतं शास्त्रं स रावणः दैववशात् विपन्नः।

व्याख्या – यस्य रावणस्य, त्रिकूटः दुर्गः = त्रिकूटपर्वतः एव दुर्गः आसीत्, समुद्रः = सागरः, परिखा = परिखातः, प्रतिकूपः आसीत् योधाः = सैनिकाः, योद्धारः, रक्षांसि = राक्षसाः आसन्। यश्च रावणः साक्षात् धनदात् = कुबेरात् धनं लभते स्म, कुबेरस्य समग्रं धनमेव तस्यासीत्, उशनसा = शुक्रेण, प्रणीतं = विरचितं, शास्त्रं = नीति-शास्त्रमासीत्, यः रावणः शुक्रप्रणीतस्य नीतिशास्त्रस्य पण्डितः आसीत्, सः रावणः अपि, दैववशात् = भाग्यवशात्, विपन्नः = नष्टः अभवत्।

अन्धकः कुब्जकश्चैव, त्रिस्तनी राजकन्यका।
त्रयोऽप्यन्यायतः सिद्धाः समुखे कर्मणि स्थिते॥ 84॥

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

Meaning - A blind man, a hunch-back, and a princess with three breasts— all three gained their objects by wrong means when fate turned favourably towards them.

अन्वय: - संमुखे कर्मणि स्थिते, अन्धक: कुब्जक:, त्रिस्तनी राजकन्यका च त्रय: एव अन्यायत: अपि सिद्धा: (अभवन्)।

व्याख्या - संमुखे = अनुकूले, कर्मणि = भाग्ये, स्थिते = समुपस्थिते, संस्थिते सति, अन्धक: = अन्ध:, कुब्जक: त्रिस्तनी = स्तनत्रययुक्ता, राजकन्यका च = राजपुत्री चेति, त्रय: एव अन्यायत: अपि = असत्कार्यं कुर्वाणा:, अन्यायं समाचरन्त: अपि, सिद्धा: = स्वं स्वं मनोरथं प्राप्तवन्त:, स्वार्थं लब्धवन्त:।

## Important prose portions, their meaning and explanation

''तच्छ्रुत्वा राक्षसोऽपि व्यचिन्तयत्—'' नूनं यथाऽहं, तथान्योऽपि कश्चिद्विकालनामऽस्या हरणाय नित्यमेवागच्छति, परं सोऽप्येनां हर्तुं न शक्नोति। तत्तावदश्वरूपं कृत्वाश्वमध्यगतो निरीक्षयामि-किंरूप: स: किंप्रभावश्चेति? एवं राक्षसोऽश्वरूपं कृत्वाऽश्वानां मध्ये तिष्ठति।

Meaning - Hearing that, the Rākṣasa thought, 'Like me, every day, another Rākṣasa by name Vikāla might have come to take away this princess. But to him also, it is not possible to kidnap her. So, I woll assume the form of a horse and observe his form and strength.'' Thinking like this, he assumed the form of a horse and stayed in the horse stable.

व्याख्या - तत् = त्रिस्तन्या: वाक्यं, श्रुत्वा = आकर्ण्य, राक्षस: अपि व्यचिन्तयत् = चिन्तितवान्— नूनम् = अवश्यम्, यथा अहं तथा अन्य: अपि = अपर: अपि, कश्चित् = कश्चन, विकालनामा = विकालनामधेय: अस्या: = त्रिस्तन्या:, हरणाय = अपहरणाय, नित्यम् एव = प्रतिदिनम् एव, आगच्छति = आयाति, परं = किन्तु, स: अपि एनां = त्रिस्तनीं, हर्तुं = अपहर्तुं न शक्नोति = न पारयति। तत् = तस्मात्, अश्वरूपं कृत्वा = अश्वस्य रूपमासाद्य, अश्वमध्यगत: = अश्वानां मध्ये स्थित:, निरीक्षयामि = पश्यामि यत् किंरूप: स: किंप्रभाव: चेति = स: विकालनामधेय: अपर: राक्षस: कीदृश: अस्ति, तस्य शक्ति: च कीदृशी वर्तते। एवं मनसा अवधार्य राक्षस: अश्वरूपं कृत्वा = अश्वस्य रूपं प्राप्य, अश्वानां तुरगानां मध्ये, तिष्ठति = निवसति।

''चौरोऽपि दूरं गत्वा, खलीनाकर्षणेन तं स्थिरं कर्तुमारब्धवान्। स तु वेगात्वेगतरं गच्छति। अथ तं तथाऽगणितखलीनाकर्षणं मत्वा चौरश्चिन्तयामास— अहो, नैवंविधा वाजिनो भवन्त्यगणितखलीना:। तन्नूनमनेनाऽश्वरूपेण राक्षसेन भवितव्यम्। यद्यदि कश्चित्पांसुलं भूमिदेशमवलोकयामि तदात्मानं तत्र पातयामि। नाऽन्यथा मे जीवितव्यमस्ति।''

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

Meaning - ''After covering some distance the thief tried to stop it by putting the bridle bit. But this horse continued to run as usual. The thief was afraid and thought— ''In spite of pulling the bridle bit, this horse is running unaffected. So, this can not be a real horse. It must be Rākṣasa in the form of a horse. For my survival, I will have to jump on the soft land full of dust. It is not possible for me to do anything else.''

व्याख्या – चौर: अपि दूरं गत्वा = किञ्चित् अग्रे गत्वा, खलीनाकर्षणेन = कविकाकर्षणेन, तं राक्षसरूपाश्वं स्थिरं = धीरं, कर्तुं = विधातुम्, आरब्धवान् = प्रारभत, किन्तु स: राक्षसरूपाश्व: तु वेगात्वेगतरं = तीव्रात्तीव्रतरं गच्छति = प्रधावति। अथ = अनन्तरं तं = राक्षसरूपाश्वं तथा = तेन प्रकारेण धावमानं तं अगणितखलीनाकर्षणं = विगणितकविकाकर्षणं, मत्वा = स्वीकृत्य वेति, चौर: चिन्तयामास = अचिन्तयत्—''अहो, न एवंविधा: = नहि तावत् ईदृशा:, वाजिन: = अश्वा:, भवन्ति = जायन्ते, अगणितखलीना: = विगणितकविकाकर्षका:। तत् = तस्मात्, नूनम् = अवश्यमेव, अनेन = एतेन, अश्वरूपेण = राक्षसेन अश्वरूपिणा राक्षसेन, भवितव्यम् = भाव्यम्। यद्यदि = यदि कुत्रचित्, पांसुलं = सिकताबहुलं, भूमिदेशं = भूमिप्रदेशं, अवलोकयामि = पश्यामि, तदा = तर्हि, आत्मानं = निजं, स्वं = वेति, तत्र = तस्मिन् सिकताबहुले भूमिप्रदेशे (स्थाने), पातयामि। न अन्यथा = नापर: अन्य:, मे = मम, जीवितव्यं = जीवनं, अस्ति = वर्तते। तद् विना आत्मन: जीवनरक्षणाय अन्य: उपाय: नास्तीति भाव:।''

**SAQ :**

1. राज्ञ: भद्रसेनस्य दुहितु: नाम किमासीत् ?
2. राजकन्या स्वसखीं किं उक्तवती ?
3. राक्षस: 'विकाल' इत्यनेन किं ज्ञातवान् ?
4. आत्मरक्षणाय चौर: किं कृतवान् ?
5. राक्षस: किमर्थम् अश्वरूपं धृतवान् ?
6. वानर: राक्षसं किम् अकथयत् ?
7. वानर: चौरं राक्षसाऽभ्यधिकं कथम् अमन्यत ?
8. राक्षसं वानराहूतं ज्ञात्वा चौर: किं कृतवान् ?

### 3.6 अन्धक-कुब्जक-त्रिस्तनी-कथा (The king and his daughter)

**कथासार: (Story in brief)**

In the northern part, there was a town called Madhupura. A king by the name Madhusena, lived there. He had a daughter by

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

name Tristani (having there breasts). When, the king came to know about the birth of three breast baby, he told his Kanchuki, ''Bring this child and leave it in the distant forest, so that nobody should know about it.'' Hearing this the Kanchuki said to the king, ''Oh Majesty, it is not a good sign to have the birth of a three breasted child. So, it is better to call a Brahmin and seek his advice about it. Because a wise man should be always enquiring; for a Brāhmaṇa once effected his escape, although caught by a huge demon, because he asked a question.

## Important Ślokas, prose portion, their meaning and explanation

यः सततं परिपृच्छति, शृणोति, सन्धारयत्यनिशम्।
तस्य दिवाकरकिरणैर्नलिनीव विवर्द्धते बुद्धिः॥ 85 ॥

Meaning - The intellect of him who always enquires, listens and lays it to heart constantly, ever grows like a day-lotus by the rays of the sun.

अन्वयः - यः सततं परिपृच्छति, शृणोति, अनिशं संधारयति च, तस्य बुद्धिः दिवाकरकिरणैः नलिनी इव विवर्द्धते।

व्याख्या - यः = यः मनुष्यः जनो वा, सततं = सदैव, सर्वदा, परिपृच्छति = पृच्छति, प्रश्नान् करोति, पृच्छन् वा तिष्ठति, पृष्ट्वा कार्यं करोति वा, शृणोति = आकर्णयति, अन्यस्य वचनमादेशं वा पालयति, अनिशं = अहर्निशं, संधारयति = धारयति, अन्यस्य वचनं समाकर्ण्य तदनुसारमाचरति, तस्य = तस्य मनुष्यस्य बुद्धिः, दिवाकरकिणैः = सूर्यरश्मिभिः, नलिनी इव = कमलिनी इव, विवर्द्धते = विकसिता भवति।

पृच्छकेन सदा भाव्यं पुरुषेण विजानता।
राक्षसेन्द्रगृहीतोऽपि प्रश्नान्मुक्तो द्विजः पुरा॥ 86 ॥

Meaning - A wise man should be always enquiring, formerly a Brāhmaṇa, though caught by a huge demon, was saved by asking a question.

अन्वयः - विजानता (अपि) पुरुषेण सदा पृच्छकेन भाव्यम्। पुरा राक्षसेन्द्रगृहीतः अपि द्विजः प्रश्नात् मुक्तः।

व्याख्या - विजानता = अवगच्छता, जानता अपि, पुरुषेण = मनुष्येण, सदा = सर्वदा, पृच्छकेन = प्रश्नकर्त्रा, प्रश्न-परिपृच्छकेन, भाव्यं = भवितव्यम्। यतोहि पुरा = प्राचीनकाले, राक्षसेन्द्रगृहीतः = राक्षसराजेन संगृहीतः, आकलितः, निगृहीतः अपि, द्विजः = ब्राह्मणः, प्रश्नात् = प्रश्नकरणात् वेति, मुक्तः = राक्षसेन उन्मुक्तो मोचितो बभूव।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

''अस्त्युत्तरापथे मधुपुरं नाम नगरम्। तत्र मधुसेनो नाम राजा बभूव। तस्य कदाचिद्विषयसुखमुनभवतस्त्रिस्तनी कन्या बभूव। अथ तां त्रिस्तनीं जातां श्रुत्वा, स राजा कञ्चुकिनः प्रोवाच— यत् भोः! त्यज्यतामियं त्रिस्तनी, गत्वा दूरेऽरण्ये यथा कश्चिन्न जानाति।''

Meaning - In the Uttarāpatha, there was a city called Madhupura. There lived a king by name Madhusena. While enjoying the pleasure of love, he had a daughter, who had three breasts. After coming to know about the birth of three breasted child, the king told his attendants, ''Bring this child and leave it in the distant forest, so that nobody should know about it.

व्याख्या – अस्ति = विद्यते, उत्तरापथे = उत्तरस्यां दिशि, मधुपुरं नाम नगरम् = मधुपुर-इत्याख्यं नगरम्। तत्र = तस्मिन् मधुपुरे, मधुसेनो नाम = मधुसेननामधेयः, राजा = नृपः, बभूव = अभवत्। तस्य = राज्ञः मधुसेनस्य, कदाचित् = कस्मिंश्चित् काले, विषयसुखम् = रतिसुखम्, अनुभवतः = प्राप्नुवतः, त्रिस्तनी = स्तनत्रययुक्ता, कन्या = पुत्री, दुहिता, बभूव = जन्म लेभे। अथ = अनन्तरं, तां त्रिस्तनीं = स्तनत्रययुक्तां, जातां = कन्यकां समुत्पन्नां श्रुत्वा = आकर्ण्य, स राजा = मधुसेनः, कञ्चुकिनः = अन्तः पुररक्षकान्, प्रोवाच = समादिशत् यत् भोः त्यज्यतां = विसर्ज्यतां. दूरे परित्यज्यताम्, इयं = एषा, त्रिस्तनी = स्तनत्रययुक्ता कन्येति, गत्वा, दूरे अरण्ये = वने, यथा = येन, कश्चित् = कोऽपि, न जानाति = न जानीयात्।

**SAQ :**

1. राक्षसेन गृहीतः द्विजः कस्मात् विनिर्मुक्तः ?
2. कीदृशस्य जनस्य बुद्धिः वर्द्धते ?
3. मधुसेनः कुत्र वसति स्म ?
4. मधुसेनः कञ्चुकिनः किं कथयामास ?
5, मधुसेनस्य कीदृशी कन्या अजायत ?

### 3.7 रासभगृहीत-ब्राह्मण-कथा
### (The Blind man and his three breasts wife)

**कथासारः (Story in brief)**

In a forest, there lived a Rākṣasa called Chaṇḍakarnā. One day, while wandering, he met a Brahmin, sat on his shoulders and told, ''Oh! Brahmin go ahead.'' The Brahmin began to proceed fearfully. While proceeding with Rākṣasa seated on his shoulders, the Brahmin felt that the feet of the Rākṣasa were cold and tender. So, he asked him as to why his feet were so delicate? The Rākṣasa

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

replied, ''I have a vow not to land wet feet on the soil. When the Brahmin came near a lake, the Rākṣasa told to him, ''I will take bath in this lake. I will come back after worshipping the God. Till then don't move from this place.'' Now the Brahmin told himself, ''I will be eaten by the Rākṣasa, when he will come back. I should move quickly from here. The Rākṣasa will definitely not come after me because of not breaking his vow.'' That's why it is said that, ''a wise man should be always enquiring. Because of this policy, the Brahmin could escape from the Rākṣasa.''

Hearing this, the king called the Brahmins and asked them, Oh! Brahmins, I have a three breasted daughter. Is there any remedy for this?'' The Brahmins replied, Oh king! Do not see your new born baby, who has three beasts. If any one wants to marry her, arrange for the marriage and sent them to a different country. Then, the king ordered for the proclamation that, ''any body who wants to marry her three breasted daughter, will have one lakh of gold coins and has to leave this country.'' Many days passed after issuing the proclamation but there was no response from anybody. Meanwhile, the princess grew as an adult.

A blind man lived in that town. He had a bent dwarf man by name Mantharaka as his friend. Both of them heared about the King's proclamation, consulted each other and finally the blind man decided to marry the princess. By the order of the king all formalities of the marriage have been done nearby the river. The king's officials gave one lakh (coins and told the boatman to lake) the new couple and Mantharaka, the bent dwarf man and leave them in any town of a different country. Accordingly, the instruction were followed. They purchased a house out of money given by the king and lived happily in their new city. As the days passed, the princess fell in love with the bent dwarf man Mantharaka.

One day, she (Tristani) decided to kill the blind man by giving him poison. So, she said to Mantharaka to get poison. One day while wandering Mantharaka got a dead black poisonous snake, brought it home and said to Tristani, ''Oh my dear. I got this poisonous snake. Take it and cut it into pieces. Then refine it and save this blind man with this food. Telling this Mantharaka went out of the house. Accordingly, Tristani cut the snake into pieces, placed them in a vessel and started cooking on the flameful fire and said to her husband the blind one. ''I have many domestic

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

works. So, please hold this spoon and help me in cooking this food. While the blind man was cooking the food, the vapour of the flesh of the poisonous snake got struck to his eyes. He felt change. So he exposed his eyes to that vapour again.

Gradually he gained the vision and was able to see clearly. After regaining his sight, he saw pieces of black snake and thoght to himself, ''I must know the reality about whose trick is this. Who wants to kill me?''

He continued his work of cooking. But behaved like a blind man. In the mean time, the bend dwarf man came there and started involving himself in embracing and kissing Tristani. The blind man saw this and became angry. He moved to his previous place and caught the feet of the bent dwarf man. Then forcibly held him upwards and turned him round and round on his head. Then he forcefully beat with his fist to Tristani on her chest. Because of beating by the blind man, the third breast of Tristani disappeared. In the same way the bent dwarf man became straight. Thus all the three succeded in their objects through faults. It is true, if the luck favours, every thing goes smooth.

### Important Ślokas, their meaning and explanation

लज्जा स्नेह: स्वरमधुरता बुद्धयो यौवनश्री:,
कान्तासङ्ग: स्वजनममता दु:खहानिर्विलास:।
धर्म: शास्त्रं सुरगुरुमति: शौचमाचारचिन्ता,
पूर्णे सर्वे जठरपिठरे प्राणिनां सम्भवन्ति॥

Meaning - Modesty, affection, clearness of voice, discretion, goodness of heart, vitality, passion, relationship with one's kinsmen, absence of pain, sports, discharge of religious duties, knowledge of the Śāstras, a talent like that of Bṛhaspati, purity and the thought about conforming to the rules of conduct— all these proceed in the case of men when the pot in the form of the belly is full of grain.

अन्वय: – लज्जा, स्नेह:, स्वरमधुरता, बुद्धय:, यौवनश्री:, कान्तासङ्ग:, स्वजनममता, दु:खहानि:, विलास:, धर्म:, शास्त्रं सुरगुरुमति:, शौचम्, आचारचिन्ता सर्वे प्राणिनां जठरपिठरे पूर्णे सम्भवन्ति।

व्याख्या – लज्जा = ह्री:, स्नेह: = अनुराग:, स्वरमधुरता = प्रिय-भाषणं, मधुरभाषित्वं, बुद्धय: = धिय:, यौवनश्री: = युवावस्था, कान्तासङ्ग: = स्त्रीप्रसङ्ग:, स्वजनममता = आत्मीयै: जनै: सार्द्धं प्रीति:, दु:खहानि: = कष्टरहितत्त्वम्,

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

विलासः = भोगः, धर्मः = स्वकर्तव्यानुष्ठानम्, शास्त्रं = विद्याभ्यासः, सुरगुरुमतिः = देवेषु आचार्येषु च पूज्यत्वबुद्धिः, शौचम् = पवित्रता, आचारचिन्ता = सदाचरणविचारः, सर्वे = एतत् उपर्युक्तं सर्वमपि, प्राणिनां = मनुष्याणां, जठरपिठरे = उदरभाण्डे, पूर्णे = परिपूरिते, संभवन्ति = संजायन्ते। उदरे पूरिते सति एव मनुष्याणां मनस्सु प्रागुक्तं सर्वं संपद्यते। रिक्ते उदरे न कस्मैचित् किमपि रोचते।

यदि स्याच्छीतलो वह्निश्चन्द्रमा दहनात्मकः।
सुस्वादुः सागरः स्त्रीणां तत्सतीत्वं प्रजायते ॥ 91 ॥

Meaning - If fire be cold, if the moon be of a burning nature, if the sea has sweet water, (which is impossible), then there can be chastity in women.

अन्वयः - यदि, वह्निः = अग्निः स्वकीयां स्वाभाविकोष्णतां विहाय, शीतलः भवेत् शैत्यं प्राप्नुयात्, चन्द्रमा = चन्द्रः, दहनात्मकः = उष्णः संजायेत तथा च सागरः = समुद्रः, सुस्वादुः = सुपेयः क्षारत्वरहितः भवेत्, तत् = तर्हि, स्त्रीणां = नारीणां, सतीत्वं = पातिव्रत्यं प्रजायते = समुत्पद्यते। अग्नौ शीतले, चन्द्रे उष्णे सागरे च सुपेये संजाते सति कदाचित् स्त्रियः सतीत्वं पालयितुं समर्थाः भवेयुः।

## Imortant prose portion, their meaning and explanation

"सोऽपि तदाकर्ण्य हृष्टमनाः सृक्कणी परिलिहन् द्रुतमुत्थाय, दर्वीमादाय प्रमथितुमारब्धः। अथ तस्य मत्स्यान्मथ्नतो विषगर्भवाष्पेण संस्पृष्टं नीलपटलं चक्षुर्भ्यामगलत्। असावप्यन्धस्तं बहुगुणं मन्यमानो, विशेषान्नेत्राभ्यां वाष्पग्रहणमकरोत्।"

Meaning - Hearing this, the blind man got delighted. Licking the corners of his mouth, he took the spoon quickly and started to help the cooking. While he was cooking the black covering of film dropped from his eyes being fumigated with the vapour charged with venom. Thinking it did him much good, he exposed his eyes to that vapour again.

व्याख्या - सः अपि = अन्धः अपि, तत् आकर्ण्य = भार्यया त्रिस्तन्या समादिष्टं वाक्यं श्रुत्वा, हृष्टमनाः = प्रसन्नमनाः, सृक्कणी = ओष्ठौ, ओष्ठभागौ, परिलिहन् = जिह्वया परिलिहन्, द्रुतं = शीघ्रम्, उत्थाय, दर्वीम् आदाय = गृहीत्वा, प्रमथितुम् = परिचालयितुं, आरब्धः = प्रारब्धवान्। अथ = अनन्तरं, तस्य = अन्धस्य, मत्स्यान् = मीनान्, मथ्नतः = परिचालयतः, विषगर्भवाष्पेण = गरलमिलितवाष्पेण, विषमिश्रितवाष्पेण वेति, संस्पृष्टं = विषमिश्रितवाष्पस्य संस्पर्शं प्राप्य, नीलपटलं = तदीयनेत्रयोः नीलम् आवरणं, चक्षुर्भ्याम्, अगलत् = अस्रवत्। असौ अपि अन्धः = सः अन्धः अपि, बहुगुणं = लाभप्रदं चैतत् इति मन्यमानः = विचारयन्, विशेषात् = विशेषतः नेत्राभ्यां = नयनाभ्यां, वाष्पग्रहणम् = वाष्पसेवनन्, अकरोत् = चकार।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

"ततो लब्धदृष्टिर्जातो यावत्पश्यति, तावत्तक्रमध्ये कृष्णसर्पखण्डानि केवलान्येवावलोकयति। ततो व्यचिन्तयत्—"अहो, किमेतत्? मम मत्स्यामिषं कथितमासीदनया। एतानि तु कृष्ण-सर्पखण्डानि। तत्तावद्विजानामि सम्यक् त्रिस्तन्याश्चेष्टितं, किं मम वधोपायक्रमः कुब्जस्य वा। उताहो अन्यस्य वा कस्यचित्।" एवं विचिन्त्य स्वाकारं गूहन्नन्धवत्कर्म करोति, यथा पुरा।"

Meaning - After regaining his sight, the blind man saw pieces of black snake kept mixed with buttermilk. He thought, "Oh, what is this? She (Tristani) told me that this is the fish meat. But these are pieces of black snake. I should know properly about whose trick is this. Who wants to kill me? The bent dwarf man. Tristani or any other person?" Thinking like this, he continued his work. But he behaved like a blind man, as he was.

व्याख्या – ततः = विषमिश्रितवाष्पग्रहणेन, लब्धदृष्टिः जातः = प्राप्तदृष्टिः सः अन्धः, यावत्पश्यति = यदा अवलोकयति, तावत् = तदा, तक्रमध्ये कृष्णसर्पखण्डानि केवलानि एव अवलोकयति = पश्यति। ततः = तत् दृष्ट्वा, व्यचिन्तयत् = विचारयामास— "अहो किमेतत् = किम् इदम्? मम मत्स्यामिषं = मत्स्यखण्डानि इमानि सन्तीति, कथितम् = उक्तम्, आसीत् अनया = त्रिस्तन्या। एतानि = इमानि, तु = निश्चयेन कृष्ण-सर्पखण्डानि सन्ति। तत् = तर्हि तावत् विजानामि = अवगच्छामि सम्यक्, त्रिस्तन्याः मम भार्यायाः, चेष्टितं = कृत्यम्, किं वा मम = मे, वधोपायक्रमः = वधस्य उपायः कुब्जकस्य वेति। उताहो = अथवा, अन्यस्य वा = अपरस्य वा कस्यचित्।" एवं विचिन्त्य = एवं चिन्तयित्वा, स्वाकारं = स्वकीयं वास्तविकं रूपं, दृष्टियुक्तं स्वरूपं गूहन् = अप्रकटयन्, अन्धवत् = अन्ध इव, नेत्रदृष्टिरहित इव, कर्म = कार्यं, करोति = विदधाति, यथा पुरा = यथा पूर्वं करोति स्म।

**Check Your Progress :**

**1. Elucidate the idea contained in the following :**

(a) ........ "पूर्णे सर्वे जठरपिठरे प्राणिनां सम्भवन्ति"।

(b) ........ "पृच्छकेन सदा भाव्यम्"।

## 3.8 भारुण्डपक्षिकथा (The twinheaded Bird)

### कथासारः (Story in brief)

Once upon a time, there lived a bird by name Bhāruṇḍa in a lake. It had two heads, but only one stomach. Once, while wandering on the seashore, the bird go a sweet fruit and began to eat it. This was the most delicious fruit the bird had ever eaten.

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

As the bird had two heads, the other head protested, ''I am your brother head. Why don't you let me also eat this tasty fruit''? Then, the first head of the bird replied, ''Friend! You know that we have only one stomach. Whichever head eats (See copy) it. So, it is better to gratify our beloved by the remaining portion of the fruit to her.'' Telling this, the first head gave the remaining fruit to the Bhāruṇḍi, That day onwards, the second head became silent. This kind of selfishness on the part of the first head pinched him very much. One day, the second head got a poisonous fruit and told to the first head. ''Oh, wicked fellow, you are cruel and heartless, I have to eat this poisonous fruit for the offence made by you.''

''Please don't eat this poisonous fruit.'' cried the first head. ''If you eat it, both of us will die, because we have common stomach to digest it.'' But in the meanwhile, the second head ate the poisonous fruit. As a result both of then died.

### Important Ślokas, their meaning and explanation

एक: स्वादु न भुञ्जीत, नैक: सुप्तेषु जागृयात्।
एको न गच्छेदध्वानं, नैकश्चार्थान्प्रचिन्तयेत्॥ 9॥

Meaning - One should not eat a sweet thing alone, one should not wakeup alone while others are sleeping, one should not go on a journey alone and one should not think of gainings wealth alone.

अन्वय: - एक: स्वादु न भुञ्जीत, एक: (अन्येषु) सुप्तेषु न जागृयात्। एक: अध्वानं न गच्छेत्। एक: व अर्थान् न प्रचिन्तयेत्।

व्याख्या - एक: = एकाकी जन:, स्वादु = मधुरं खाद्यवस्तुजातं, न भुञ्जीत = न खादेत्। एक: अन्येषु जनेषु, सुप्तेषु = निद्रितेषु, निद्रामुपागतेषु, न जागृयात् = जागरणं न कुर्यात्। एक: च अर्थान् = एक: जन:, एकाकी मनुष्य: प्राप्तं धनं, न प्रचिन्तयेत् = विचारयेत्। प्राप्तस्य धनस्य एकाकिना केनचित् जनेन उपभोग: न युज्यते।

अपि कापुरुषो मार्गे द्वितीय: क्षेमकारक:।
कर्कटेन द्वितीयेन जीवितं परिरक्षितम्॥

Meaning - On a journey, a companion, although he may be an insignificant person, does a good service, a crab that was taken as a companion, saved the life of a person.

अन्वय: - मार्गे कापुरुष: अपि द्वितीय: क्षेमकारक: (भवति)। (यतोहि) द्वितीयेन (सहावस्थानत्वात्) कर्कटेन जीवितं परिरक्षितम्।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

व्याख्या – मार्गे = यात्रायां, कापुरुषः अपि = भयातुरः, भयशीलः जनः अपि, क्षेमकारकः = हितकरः, कल्याणकारकः भवति। यतोहि सहावस्थानत्वादेव, द्वितीयेन = अपरेण, कर्कटेन जीवितं = जीवनं, परिरक्षितम् = संरक्षितम्। ब्राह्मणेन सह अवस्थितः कर्कटोऽपि कृष्णसर्पं हत्वा ब्राह्मणं रक्षितवान्।

## Important prose portion, its meaning and explanation

''कस्मिंश्चित्सरोवरे भारुण्डनामा पक्षी एकोदरः, पृथग्ग्रीवः प्रतिवसति स्म। तेन च समुद्रतीरे परिभ्रमता किंचित्फलममृतकल्पं तरङ्गक्षिप्तं सम्प्राप्तम्। सोऽपि भक्षयन्निदमाह— ''अहो, बहूनि मयाऽमृतप्रायाणि समुद्रकल्लोलाहतानि फलानि भक्षितानि। परमपूर्वोऽस्यास्वादः। तत्किं पारिजात-हरिचन्दन-तरुसंभवम्? किं वा किंचिदमृतमयफलमयमव्यक्तेनाऽपि विधिनाऽपातितम्।''

Meaning - In a lake, there lived a bird by the name of Bhāruṇḍa. The bird had one stomach and two heads. It got a sweet fruit, while wandering on the seashore. The fruit was tasty as nectar. It was thrown up by the waves. Which eating the fruit, the first head told, ''Oh, I have eaten so many sweet fruits like nectar brought to the shore by the billows of the sea. But this fruit is wonderful. what is it? Is it a fruit of Pārijāta. Harichandana or fruit of Amrita sent by almighty or unseen force for me?

व्याख्या – कस्मिंश्चित् सरोवरे = कस्मिंश्चित् जलाशये, भारुण्डनामा = भारुण्डनामकः, पक्षी = एक खगः, एकोदरः = एकोदरधारी, पृथग्ग्रीवः = मुखद्वयान्वितः, प्रतिवसति स्म = निवसति स्म। तेन = भारुण्डकेन ग्रीवाद्वयान्वितेन, च समुद्रतीरे = सागरतटे परिभ्रमता = विचरता, किंचित् फलं = किमपि एकं फलम्, अमृतकल्पं = अमृततुल्यं, अमृतमिव मधुरम्, तरङ्गक्षिप्तं = जलवीचिभिः प्रक्षिप्तं, प्राप्तम् = अधिगतम् (लब्धम्)। सः अपि प्रथमं मुखम् अपि, भक्षयन् = तद् फलं खादन्, इदम् आह = एतत् कथयामास— अहो बहूनि = अनेकानि मया अमृतप्रायाणि = अमृतमयानि, समुद्रकल्लोलाहतानि = सागरतरङ्गैः समानीतानि फलानि, भक्षितानि = खादितानि। परम् = अपूर्वः = अभिनवः, अस्य = फलस्य आस्वादः। तत् किं = तर्हि किम् पारिजातहरिचन्दनतरुसंभवम् = पारिजातवृक्षात् हरिचन्द-नवृक्षात् वा समुद्भवं समुत्पन्नम् इदं फलम्? किं वा किंचित् अमृतमयफलमयम् = अमृततुल्यमिदं फलम्, अव्यक्तेन = अलक्षितेन, विधिना = दैवेन, आपातितम् = परित्यक्ते निक्षिप्तं वेति।

### Stop to consider :

- भारण्डः :- The fabulous birds, called भारुण्ड or भारण्ड, live, according to the Hindu writers, in the country of the Uttarakurus.
- पारिजाततरुः, हरिचन्दनतरुः- One of the five heavenly trees, देववृक्षः।

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

**SAQ :**

1. भारुण्डः कीदृशः खगः आसीत् ?
2. सः फलं खादन् किम् अवदत् ?
3. एकाकी मनुष्यः किं किं न कुर्यात् ?
4. अपमानात् द्वितीयं मुखं किम् अकरोत् ?
5. प्रथमं मुखम् अवशिष्टं फलं किं कृतवत् ?
6. द्वितीयं मुखं किमर्थं सविषादं तिष्ठति स्म ?

### 3.9 ब्राह्मणकर्कटकथा (The Brahmin and the Crab)

**कथासारः (Story in brief)**

In a certain town, there lived a Brahmin known as Brahmadatta. One day when he was about to leave for a village on account of some business, his mother told him, ''My boy! Why are you going alone, search for a companion.'' Brahmadatta told, ''Don't worry mother. The path is fearless. I am going alone for some assential work. By realising his determination, the mother went to nearby well and got a crab. Then she gave the same to her son and advised that, ''As you are going alone, have this crab and keep with you. ''With due respect, Brahmadatta took the crab in his camphor box and set out. On his way, tired by the intense summer heat, he took shelter below a tree and fell sleep. In the meantime, a snake crept towards Brahmadatta from the nearby tree. Being attarcked by the natural fondness of the camphor, it entered the box and started eating the same. Meanwhile, the crab came out and killed the snake. When Brahmadatta awoke, he saw a dead black snake lying on the camphor box. He understood that the snake had been killed by the crab. He realised that what my mother told is an eternal truth. One should not go alone.

**Important Ślokas their meaning and explanation**

क्षीणः श्रयति शशी रविमृद्धो वर्द्धयति पायसां नाथम्।
अन्ये विपदि सहाया धनिनो, श्रियमनुभवन्त्यन्ये ॥ 95 ॥

Meaning - अमावस्यायां कलारहितः चन्द्रः सूर्यम् आश्रयते। स एव चन्द्रः पुनः पूर्णिमायां कलायुक्तः सन् सूर्यं विस्मरति, समुद्रं समाह्लादयति। अनेनात्र स्पष्टमेतत् भवति यत् विपत्तिकाले धनिकानां सहयोगिनः अन्ये भवन्ति, किन्तु तेषां धनस्य उपभोगं अपरे जनाः कुर्वन्ति।

अन्वयः - क्षीणः शशी रविं श्रयति, ऋद्धः पायसां नाथं वर्द्धयति। विपदि धनिनां सहाया अन्ये (भवन्ति), श्रियम् अन्ये अनुभवन्ति।

व्याख्या - क्षीणः = अविकलः शशी = चन्द्रः, रविं = सूर्यं, श्रयति = आश्रयते। ऋद्धः = समृद्धः पूर्णकलायुक्तः चन्द्रः पायसां = जलानां, नाथं = स्वामिनं,

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

पतिं = समुद्रं, वर्द्धयति = आनन्दयति। अत: स्पष्टमेवैतत् यत्, विपदि = आपत्तौ, धनिनां = समृद्धानां, सहाया: सहायका:, अन्ये = भवन्ति, तेषां श्रियं = धनं, लक्ष्मीम्, अन्ये = इतरे जना:, अनुभवन्ति = भुञ्जन्ति।

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य, सिद्धिर्भवति तादृशी ॥ 96 ॥

Meaning - As is the faith of a man in incantations, a holy place or a respectable person, a Brāhmaṇa God. an astrologer, Medicine, one's preceptor or spiritual guide, so is the success obtained by him.

अन्वय: - मन्त्रे, तीर्थे, द्विजे, दैवे, दैवज्ञे, भेषजे, गुरौ (च) यस्य यादृशी भावना (भवति) तस्य तादृशी सिद्धि: भवति।

व्याख्या - मन्त्रे = मन्त्रसिद्धौ, तीर्थे = तीर्थयात्रायां, द्विजे = ब्राह्मणे, दैवज्ञे = भविष्यवक्तरि, भेषजे = औषधे, गुरौ = आचार्ये च यस्य मनुष्यस्य यादृशी भावना = यादृशी श्रद्धा भवति, यादृश: विश्वास: वा भवति, तस्य मनुष्यस्य तादृशी एव सिद्धि: = साफल्यं, कार्यसिद्धि: कार्यपूर्ति:, अभीष्टसंप्राप्तिर्वा भवति = जायते।

## Important prose portions their meaning and explanation

''कस्मिंश्चिदधिष्ठाने ब्रह्मदत्तनामा ब्राह्मण: प्रतिवसति स्म। स च प्रयोजनवशाद् ग्राम प्रस्थित: स्वमात्राभिहितो, यद्— ''वत्स! कथमेकाकी व्रजसि? तदन्विष्यतां कश्चिद् द्वितीय: सहाय:''। स आह—''अम्ब! मा भैषी:। निरुपद्रवोऽयं मार्ग:। कार्यवशादेकाकी गमिष्यद्गमि।'' अथ तस्य तं निश्चयं ज्ञात्वा, समीपस्थवाप्या: सकाशात्कर्कटमादाय मात्राऽभिहितं—''वत्स! अवश्यं यदि गन्तव्यं, तदेष कर्कटोऽपि सहायो भवतु। तदेनं गृहीत्वा गच्छ।''

Meaning - Once upon a time, there lived in a town, a Brahmin by name Brahmadatta. One day when the Brahmin was about to leave for a village on account of some business, his mother told him. ''Boy! Why are you going alone, search for a companion.'' Brahmadatta told, ''Don't worry mother. The path is fearless. I shall go alone for some essential work. By realising his determination, the mother went to nearby well and got a crab and by giving the same to her son Brahmadatta advised, ''My boy! When you are determined to go alone, have this crab with you, which will be helping you.

व्याख्या - कस्मिंश्चिदधिष्ठाने = कस्मिंश्चित् अधिष्ठाने = नगरे, ब्रह्मदत्तनामा = ब्रह्मदत्तनामधेय: ब्राह्मण: प्रतिवसति स्म = निवासं करोति स्म। स च = स: ब्राह्मणश्च प्रयोजनवशाद् = अत्यावश्यककार्यात्, ग्रामे = अपरस्मिन् ग्रामे, प्रस्थित: = चलित:, स्वमात्रा = निज अम्बया, अभिहित: = कथित:, यद्–वत्स! पुत्र! कथम् एकाकी गच्छसि = व्रजसि? तत् = तस्मात्, यात्रायां न केनापि एकाकिना गन्तव्यमिति लोकव्यवहारात्, अन्विष्यतां =

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

अन्वेषणं क्रियताम्, कश्चिद् द्वितीय: = कोऽपि अपर:, सहाय: = सहयोगी, सहयात्री, य: त्वया सह गन्तुं शक्नुयात्। स: = ब्रह्मदत्त:, आह = प्रोवाच— ''अम्ब! मात:! मा भैषी: = भयं मा कुरु, निरुपद्रव: = निर्विघ्न:, विघ्नबाधारहित:, अयं = एष: मया अनुसरणीय:, मार्ग: = पन्था:। कार्यवशात् = अत्यावश्यककार्यत्वात् एकाकी गमिष्यामि = एकाकी एक यास्मामि। अथ = अनन्तरं, तस्य = पुत्रस्य ब्रह्मदत्तस्य, तं निश्चयं ज्ञात्वा = परिज्ञाय, समीपस्थवाप्या: = निकटस्थवाप्या:, सकाशात् = समीपत:, कर्कटम् = कुलीरम्, आदाय = गृहीत्वा, मात्रा = अम्बया, अभिहितं = कथितं— ''वत्स! पुत्र! अवश्यं यदि गन्तव्यं = गमनम् अत्यावश्यकमस्ति चेत्, तत् एष: = तर्हि अयं, कर्कटोऽपि = कुलीरोऽपि, सहायो = तव सहयात्री, सहायक:, भवतु = अस्तु। तत् = तस्मात् वा, एनं = कर्कटं, गृहीत्वा = आदाय, गच्छ = याहि।''

''तं दृष्ट्वा व्यचिन्तयत्— ''कर्कटेनाऽयं हत:'' इति। प्रसन्नो भूत्वाऽब्रवीच्च— ''भो:! सत्यमभिहितं मम मात्रा यत्— 'पुरुषेण कोऽपि सहाय: कार्य:। नौकाकिना गन्तव्यम्।' यतो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितं तेनाऽहं कर्कटेन सर्पव्यापादनाद्रक्षित:।''

Meaning - When Brahmadatta saw a dead black snake he thought to himself, ''The snake had been killed by the crab itself.'' Then he told happily, ''What my mother told is an eternal truth. Every one should have a companion. One should not go alone.'' As I followed the path, shown by my mother, the crab saved my life by killing the black snake.

व्याख्या – तं = मृतं कृष्णसर्पं, दृष्ट्वा = वीक्ष्य, व्यचिन्तयत् = ब्राह्मण: ब्रह्मदत्त: चिन्तितवान्— ''कर्कटेन = कुलीरेण, अयम् = एष: कृष्णसर्प:, हत: = व्यापादित:'' इति। प्रसन्न: = हर्षान्वित: भूत्वा स: ब्राह्मण:, अब्रवीच्च = उक्तवान् च। – ''भो:! अयि भो:! सत्यम् = साधु, अभिहितं = कथितं, मम यात्रा = मे अम्बया यत् – पुरुषेण = मनुष्येण, कोऽपि = कश्चन, सहाय: = सहयोगी, सहायक:, कार्य: = कर्तव्य:। न एकाकिना गन्तव्यम् = गमनीयम्।'' यत: = हि मया = ब्रह्मदत्तेन, श्रद्धापूरितचेतसा = श्रद्धया, दत्तावधानेन, तद्वचनं = मातु: वचनम्, आज्ञां, अनुष्ठितं = विहितं, पालितं, तेन अहं कर्कटेन, सर्पव्यापादनात् सर्प-समासादनात्, सर्पदंशनात्, रक्षित: = मोचित:।

**SAQ :**

1. ग्रामे गन्तुं समुद्यतं पुत्रं माता किम् उक्तवती ?
2. मात्रा कर्कट: कुत: आनीत: ?
3. ब्रह्मदत्त: कर्कटं कुत्र संस्थाप्य प्रस्थित: ?
4. कृष्णसर्प: किम् अभक्षयत् ?
5. प्रबुद्ध: ब्राह्मण: किम् अपश्यत् ?

Generated by Foxit PDF Creator © Foxit Software
http://www.foxitsoftware.com For evaluation only.

### 3.10 सारांश: (Summing up)

अध्यायेऽस्मिन भवद्भिः अपरीक्षितकारके उपनिबद्धाः अपराः अन्तिमाश्च सप्त कथाः पठिताः। कथानां सारांशः अपि सुज्ञातः। तत्तत्कथागताः प्रमुखतमाः नीतिश्लोकाः गद्य-भागाश्च अर्थावगमनपुरस्सरं सम्यक् परिशीलिताः। श्लोकानां गद्यांशानां च संस्कृत-व्याख्यापद्धतिरपि आत्मसात्कृता। नीति-विषयकोपदेशप्राधान्यात् नैतिकी व्यावहारिकी सर्वथा उपयोगिनी शिक्षा चापि अधिगता।

भाषाज्ञानसंवर्द्धनाय परिमार्जितभाषाप्रयोगाय भाषासौष्ठवाय लोकव्यवहार-सदाचार-नैतिक-ज्ञानाहरणाय च कथासाहित्यं नीतिसाहित्यं गल्पसाहित्यं वा एकं महत् साधनं भवति। भवद्भिरत्र पञ्चतन्त्रस्य एकमेव तन्त्रमधीतम्। अपरस्य तन्त्रचतुष्टयस्य अध्ययनाय यतनीयम्। अस्माकं मातृभाषायामपि एवंविधाः शतशः सहस्रशः वा लोककथाः प्रचलिताः सन्ति। कथाग्रन्थेष्वपि संकलिताः प्रकाशिताश्च वर्तन्ते। तासां कथानां मातृभाषातः संस्कृत-भाषया अनुवादाय प्रयत्नो विधेयः।

सुविपुले संस्कृतसाहित्ये नीतिविषयक-कथासाहित्यातिरिक्ततया असंख्याः हास्य-विनोद-सम्बन्धिन्यः कथाः उपलभ्यन्ते। ताः कथाश्च न केवलं गद्येषु अपि तु पद्येषु अपि लिखिताः सन्ति। तादृशीनां गद्यमयीनां पद्यमयीनां च कथानामपि संग्रहः संस्कृतस्य विभिन्नेषु कथाग्रन्थेषु प्राचीनैः विद्वद्भिः कथाकारैः कृतोऽस्ति। शुभशीलगणिविरचिता प्रबन्धपञ्चशती, सोमदेवभट्ट-विरचितः कथासरित्सागरः, व्यासदास क्षेमेन्द्र-प्रणीतः नीतिकल्पतरुः, विद्यापतिविरचिता पुरुषपरीक्षा, अज्ञातलेखकेन केनापि लिखिता भरटकद्वात्रिंशिका प्रभृतयः उल्लेखयोग्याः कथाग्रन्थाः सन्ति-। एतेषां संग्रहं विधाय कालान्तरे पुनः तेषां परिशीलनमुपादेयं भविष्यति।

### 3.11 आदर्श-प्रश्नाः (Sample Questions)

1. Discuss briefly the moral lesson can be gathered from the story of the monkey and the king.
2. Elucidate the idea contained in any one of the following :
   (a) ''कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्''।
   (b) ''यादृशी भावना यस्य सिद्धिभर्वति तादृशी''।
3. Present in your words the story of the Brahmin and his dream.
4. Explain with reference to the context any one of the following :
   (a) यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां वहन्।
   कृतघ्नस्तेन पापेन नरके यात्यसंशयम्॥
   (b) तृष्णे! देवि! नमस्तुभ्यं, यया वित्ताऽन्विता अपि।
   अकृत्येषु नियोज्यन्ते, भ्राम्यन्ते दुर्गमेष्वपि॥
5. Translate into English :
   (a) मर्षयेद्धर्षणां योऽत्र वंशजां परनिर्मिताम्।
   भयाद्वा यदि वा कामात् स ज्ञेयः पुरुषाऽधमः॥

### 3.12 द्रष्टव्य-ग्रन्थाः (Suggested Readings)

1. Pañcatantraṁ by Shyamacharan Pandey.
2. Pañcatantraṁ by F. Kielhom.
3. Pañcatantra of Viṣṇuśarman by M.R. Kale
4. Pañcatantraṁ by Sanjay Sachdeva.

❖❖❖